

**Sri Lakshmi Nrusimha ParabrahmaNe Nama:**
**Sri Navaneetha Krishna ParabrahmaNe Nama:**

Srimate Sri Ramanujaya Nama: | Srimate Sri Nigamantha Maha Desikaya Nama:
Srimate Sri Adivan Satakopa Yatheendra Maha Desikaya Nama:
Srimate Sri Lakshmi Nrisima Divya Paduka Sevaka Srivan Satakopa Sri Narayana Yatheendra Maha Desikaya Nama: |
Srimate Srivan Satakopa Sri Ranganatha Yatheendra Maha Desikaya Nama:

Brindhavan Japam

# Sri Stuti:

**Swami Vedanta Desikan**

This document is prepared by Jayanthi Parthasarathy with
Asmad Acharyans Paripoorna Anugraham



**श्री स्तुतिः**

**स्वामी वेदान्त देशिकन्**

**श्रीमान वेंकट नाथर्य कविथार्किका केसरी**

**वेदान्ताचार्य वर्योमे सन्निधात्थाम् सदाहृदि**

1. मानातीत प्रथित विभवां मङ्गलं मङ्गलानां
   वक्षः पीठीं मधुविजयिनो भूषयन्तीं स्वकान्त्या।
   प्रत्यक्षानु श्रविक महिमा प्रार्थिनीनां प्रजानां
   श्रेयो मूर्तिं श्रियम् अशरणु त्वां शरण्यां प्रपध्ये॥ १॥

2. आविर्भावः कलश जलधावध्वरे वाऽपि यस्याः
   स्थानं यस्याः सरसिज वनं विष्णु वक्षः स्थलं वा।
   भूमा यस्या भुवनम् अखिलं देवि दिव्यं पदं वा
   स्तोक प्रज्ञैर् अनवधि गुणा स्तूयसे सा कथं त्वम्॥ २॥

3. स्तोतव्यत्वं दिशति भवती देहिभिः स्तूयमाना
   तामेव त्वाम् अनितर गतिः स्तोतुमाशंसमानः।
   सिद्धारम्भाः सकल भुवन श्लाट्टनीयो भवेयं
   सेवापेक्षा तव चरणयोः श्रेयसे कस्य न स्यात्॥ ३॥

4. यत् सङ्कल्पाद् भवति कमले यत्र देहिन्यमीषां
   जन्म स्थेम प्रलय रचना जङ्गमा जङ्गमानाम्।
   तत् कल्याणं किमपि यमिनाम् एक लक्ष्यं समाधौ
   पूर्णं तेजः स्फुरति भवती पाद लाक्षा रसाट्टम्॥ ४॥

Brindhavan Japam



5. निष्प्रत्यूह प्रणय गदितं देवि नित्यानपायं
विष्णुस्त्वं चेत्यनवधि गुणं द्वन्द्वमन्योन्य लक्ष्यम्।
शेषश्चित्तं विमल मनसां मौलयश्च श्रुतीनां
संपध्यन्ते विहरण विधौ यस्य शय्या विशेषाः॥ ५॥

6. उद्देश्यत्वं जननि भजतोरुज्झितोपाधि गन्धं
प्रत्यग्रूपे हविषि युवयोर् एक शेषित्व योगात्।
पद्मे पत्युस् तव च निगमैर् नित्यमन् विष्यमाणो
नावच्छेदं भजति महिमा नर्तयन् मानसं नः॥ ६॥

7. पश्यन्तीषु श्रुतिषु परितः सूरि बृन्देन सार्धं
मध्ये कृत्य त्रिगुणफलकं निर्मित स्थान भेदम्।
विश्वाधीश प्रणयिनि सदा विभ्रम द्यूत वृत्तौ
ब्रह्मेशाधा दधति युवयोर् अक्ष शार प्रचारम्॥ ७॥

8. अस्येशाना त्वमसि जगतः संश्रयन्ती मुकुन्दं
लक्ष्मीः पद्मा जलधि तनया विष्णु पत्नीन्दिरेति।
यन्नामानि श्रुति परिपणान् एवमावर्तयन्तो
नावर्तन्ते दुरित पवन प्रेरिते जन्म चक्रे॥ ८॥

9. त्वामेवाहुः कतिचिदपरे त्वत्प्रियं लोकनाथं
किं तैरन्तः कलह मलिनैः किंचिदुत्तीर्य मग्नैः।
त्वत् संप्रीत्यै विहरति हरौ संमुखीनां श्रुतीनां
भावा रूढौ भगवति युवां दम्पती दैवतं नः॥ ९॥



10. आपन्नार्ति प्रशमन विधौ बद्ध दीक्षस्य विष्णोः
आचख्युस् त्वां प्रिय सहचरीम् ऐकमत्योपपन्नाम्।
प्रादुर् भवैरपि सम तनुः प्राध्वमन् वीयसे त्वं
दूरोत्क्षिप्तैर् इव मधुरता दुग्धराशेस्तरङ्गैः॥ १०॥

11. धत्ते शोभं हरि मरकते तावकी मूर्तिराध्या
तन्वी तुङ्ग स्तन भर नता तप्त जाम्बूनदाभा।
यस्यां गच्छन्त्युदय विलयैर् नित्यमानन्द सिन्धौ
इच्छा वेगोल्लसित लहरी विभ्रमं व्यक्त-यस्ते॥ ११॥

12. आसंसारं विततमखिलं वाङ्मयं यद्विभुतिः
यद्भ्रू भङ्गात् कुसुम धनुषः किट्टरो मेरु धन्वा।
यस्यां नित्यं नयन शतकैर् एक लक्ष्यो महेन्द्रः
पद्मे तासां परिणतिरसौ भाव लेशैस् त्वदीयैः॥ १२॥

13. अग्रे भर्तुः सरसिजमये भद्र पीठे निषण्णाम्
अम्भोराशेरधिगत सुधा संप्लवादुत्थितां त्वाम्।
पुष्पा सार स्थगित भुवनैः पुष्कला वर्तकाध्यै
क्लुप्तारम्भाः कनक कलशैर् अभ्यषिञ्चन् गजेन्द्राः॥१३

14. आलोक्य त्वाम् अमृत सहजे विष्णु वक्षः स्थलस्थां
शापाक्रान्ताः शरणमगमन् सावरोधाः सुरेन्द्राः।
लब्ध्वा भुयस् त्रिभुवनमिदं लक्षितं त्वत् कटाक्षैः
सर्वाकार स्थिर समुदयां संपदं निर्विशन्ति॥ १४॥



15. आर्त त्राण व्रतिभिर् अमृता सार नीलाम्बुवाहैः
अम्भोजानाम् उषसि मिषताम् अन्तरङ्गैर् अपाङ्गैः।
यस्यां यस्यां दिशि विहरते देवि दृष्टिस् त्वदीया
तस्यां तस्याम् अहम् अहमहमिकां तन्वते संपदोघाः॥१५॥

16. योगारम्भ त्वरित मनसो युष्मदैकान्त्य युक्तम्
धर्मं प्राप्तुं प्रथममिह ये धारयन्ते धनायाम्।
तेषां भूमेर् धनपति गृहाद् अम्बरादम्बुधेर्वा
धारा निर्यान्त्यधिकम् अधिकं वाञ्छितानां वसूनाम्॥ १६॥

17. श्रेयस् कामाः कमल निलये चित्रमाम्नायवाचां
चूडा पीडं तव पद युगं चेतसा धारयन्तः।
छत्रच्छाया सुभग शिरसश् चामर स्मेर पार्श्वाः
श्लाघा शब्द श्रवण मुदिताः स्रग्विणः सञ्चरन्ति॥ १७॥

18. ऊरीकर्तुं कुशलम् अखिलं जेतुमादीनरातीन्
दूरी कर्तुं दुरितनिवहं त्यक्तुम् आध्यामविध्याम्।
अम्ब स्तम्बावधिक जनन ग्राम सीमान्त रेखाम्
आलम्बन्ते विमल मनसो विष्णुकान्ते दयां ते॥ १८॥

19. जाता काङ्क्षा जननि युवयोर् एक सेवाधि कारे
माया लीढं विभवम् अखिलं मन्य मानास् तृणाय।
प्रीत्यै विष्णोस्तव च कट्टतिनः प्रीतिमन्तो भजन्ते
वेलाभङ्गः प्रशमनफलं वैदिकं धर्मसेतुम्॥ १९॥



20. सेवे देवि त्रिदश महिला मौलि मालार्चितं ते
सिद्धि क्षेत्रं शमित विपदां संपदां पाद पद्मम्।
यस्मिन् नीषन् नमित शिरसो यापयित्वा शरीरं
वर्तिष्यन्ते वितमसि पदे वासुदेवस्य धन्याः॥ २०॥

21. सानुप्रास प्रकटित दयैः सान्द्र वात्सल्य दिग्धैः
अम्ब स्निग्धैर् अमृत लहरी लब्ध सब्रह्मचर्यैः।
घर्मे तापत्रय विरचिते गाढ तप्तं क्षणं माम्
आकिञ्चन्य ग्लपित मनट्टैर् आर्द्रयेथाः कटाक्षैः॥

**इति श्री श्री स्तुतिः संपूर्णम्**

**कवितार्किकसिंहाय कल्याणगुणसालिने**

**श्रीमते वेङ्कटेसाय वेदान्तगुरवे नमः**